श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ अरुत्तपञ्चकम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ अरुत्तपञ्चकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

स्वच्छोऽविच्छिन्नतेजा अपरिमितसमग्रामृतात्मा विशुद्ध -
स्वाकारालङ्कृतीनि प्रविमलगुणजातायुधात्माश्रितांश्च।
स्वच्छां नित्यां विभूतिं परमपदपुरीं नश्यदुत्पन्नलीला -
भूतिं च श्रीसमेतः करिगिरिवरदो रक्षितैव प्रशास्ति॥ **1**॥

सर्वेषां च स्वरूपं स्थितिमतिविमलास्तत्प्रवृत्तीरशेषाः
स्वेच्छाया एव निघ्ना विदधदधिवसन्नात्मभावेन दीव्यन्।
देवेशस्साह्यकर्ता निरवधिकरुणो वारणक्ष्माधरेन्द्रः
श्रीमानेवाश्रितेभ्यो दृढतिमिरमपास्यात्मतोषं ददाति॥ **2**॥

काया भूतमया मनोऽक्षनिचयः प्राणाश्च तुल्यास्तृणैः
बुद्धिश्चेति न कोऽप्यमीषु कथितो जीवस्ततोऽन्यस्सुखी।
धीरूपो मतिमान् निषेवणरतिस्स्यात्तादृशानां दृढ -
स्त्वन्तर्याम्यनवद्यसद्गुणनिधिर्भातीभशैलाधिपः॥ **3**॥

माध्वीपूर्णवनावृतानवरतश्रीनागशैलाधिपः
सश्रीकश्च निजोपलम्भितगुणान् विस्मार्य कर्माध्वनि।
जीवान् तद्गुणिनि प्रवर्त्यवपुराधायानुभूतान् च्युतान्
भ्रान्तान् वीक्ष्य कृपावशस्तदधिपस्तुष्टश्च सङ्क्रीडते॥ **4**॥

श्रीलोलः करिशैलसत्य इह ये चोत्तारकत्वादिकं
स्वस्मिन्नाभ्युपगम्य तत्समधियश्चान्यान् निषेव्यात्मनि।
आरोप्यानृततां तदिन्द्रियफलं पञ्चानुबन्धान् तम -
ष्षड्कं दुष्पथमाश्रितावितनुते सत्यां दयां तेषु हि॥ 5॥

श्रीलोलः करिशैलवासरसिको बीजाङ्कुरन्यायतः
प्राप्तानादिकृतक्रियान् कृतभरान् संरक्षतीत्यागताः।
आत्मोज्जीवपथं त्वनीक्ष्य सुचिरं प्रत्ने च शून्यस्थले
नृणां सञ्चरतां कृपामशिथिलामत्यादरात् यच्छति॥ 6॥

प्राणैर्योम्यैहृषीकैस्सह यमनियमावासनं धारणं च
चेतोवेद्यं च धाराकृतिमविचलितां सन्ततिं च स्मृतीनाम्।
भक्त्या ये साधयन्ति प्रशमयुतसमाधिप्रमोदं च तेषां
लक्ष्यं स्यादेव देवार्चितकरिशिखरिश्रीसमग्रामृतोऽयम्॥ 7॥

सोढुं लक्ष्मीर्न शक्ता प्रियविरहमितीव ब्रुवाणो द्विपाद्रौ
स्थास्नुः कारुण्यधाराधर इह तरणोपायदौर्लभ्यदृष्ट्या।
प्रार्थ्यां वीक्ष्यानुकम्पां शरणजुष उरूप्रीतिभाजस्सभाजः
सङ्गृह्यानुग्रहेण व्यपगमितनिशं सुप्रभाहं करोति॥ 8॥

बन्धद्वन्द्वान्निवार्य स्थितनिगळगृहात् निर्गमय्यैकनाड्या
गर्भावाप्तिस्थलोत्तारकपथमथ तद्रक्षकैस्तारयित्वा।
आत्मानं दृष्टदिव्यस्थलममितमुदं चाविनाभाविनं च
कुर्यादेवात्तवर्ष्मोन्नतकरिगिरिपः पद्मसद्मासमेतः॥ 9॥

अपारकरुणाम्बुधिः करिमहीधरश्रीधरः
स्वयं त्वसदृशः प्रभुस्स्वरम एव मोदप्रदे।
पदे महति मेलयन् सह निजैर्वितीर्याथ नः
पुरा गतिनिषेवणं वितनुते स्वकीयाङ्घ्रिसात्॥ 10॥

ब्रह्मासेवितहस्तिशैलकरुणामूर्तेः पदद्वन्द्वयोः
कारुण्याच्च सतां चतुर्निगमविन्न्याय्याध्वकाञ्चीजुषाम्।
सर्वाणीव फलान्यमूनि च पुराचार्योपदिष्टाध्वना
पद्यान्यद्य विदां द्विपञ्चकलितान्यत्यन्तहृद्यानि वै॥ 11॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धस्थमर्थपञ्चकमर्थदम्।
सश्लोकं सार्थमतनोत् गोपालार्यो सतां मुदे॥

॥ इति अरुत्तपञ्चकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥